शङ्खवच्च शब्दो निन्दितो भवति। वैदूर्य्यनिभं चन्द्रसमानवर्णं कसम्मितोत्पलसदृशवर्णं निर्म्मलाकाशसवर्णमतसीपुष्पनिभं वा कुन्तफलं श्रियं भर्त्तुर्ददाति, मधुकोशसमानवर्णं श्यामलोहवर्णं मक्षिकासवर्णं निन्दितं भवति। हंसशुकमयूरताम्रचूडघटनन्द्यावर्त्तकूर्म्मतुल्यसरित्प्रभा अन्ये च मङ्गलशंसिनः पदार्थाः कुन्तव्रणेषु यदि दृश्यन्ते तदा ते धर्म्मकामार्थसाधका विनिर्द्दिष्टाः। पादुकोलूकपादपवायसश्वगृध्रजम्बूकनिगलककलासास्थ्येवं निन्दिताः पदार्था दृश्यन्ते व्रणेषु ते दृष्टाः श्रियमपहरन्ति भर्त्तुरिति व्रणलक्षणम्। छाया वक्ष्यते ध्वजपताकाचामरच्छत्रतोरणशिविकावेश्माङ्कुशवर्द्धमानभृङ्गारगजतुरङ्गा यस्मिन् कुन्तफले दृश्यन्ते धौतच्छायान्तरगतास्तं कुन्तमपुण्यकृतो न लभन्ते नकुलसृक्ककसूकरमहिषवायसोलूकपल्मीकादयो ये निन्दिता यदि कुन्ते सुधौतव्यक्ता तदा स कुन्तः श्रियं भुज्यमानामपि विनाशयेद्यस्तादृशकुन्तं बिभृयात्। स वधं बन्धं सद्योलभेत तस्य महिषी वा। चूलिकयोर्व्याधिनखस्य शुक्लानि चूर्णानि समभागानि कारयेत्। तत् चूर्णितं कृत्वा तेन चूर्णेन फले घर्षोपघर्षितं कुन्तफलं निर्म्मलं भवति दुर्गन्धं न भवेत्तथा मलेन न लिप्यते। तच्च वर्म्मकोषसमन्वितं समाहितं कारयेन्नालिकावस्त्रिर्व्रणं सुदृढायामेन अनुबन्धेन सुश्लिष्टैर्मुक्तादैर्वैलक्षकैः सुवर्णमये रजतमये वा वर्म्मणि रत्नोलङ्कृतैर्नलिका श्लिष्टा कर्त्तव्या। स्कन्धे दृढपरिग्रहस्य तथाचोक्तं कुन्तस्य कर्त्तव्यं नलिकासहजं वा। नलिका चात्र प्रमाणतः श्लिष्टा कार्य्या हरीतकीसदृशन्तालफलसमानं विल्वफलाकारं ककुभकपित्थफलसदृशं वा वृत्तमष्टास्रं वा कलशामलकाकारं वा भवति सर्वोपस्करान्वितं कुन्तायुधं षष्टिपलं श्रेष्ठं पञ्चाशत्पलं मध्यमं चत्वारिंशत्पलं निकृष्टमिति प्रबलरिपुविनाशकं क्रियान्वितञ्च कुन्तं कारयेन्नतु स्वप्रमाणादधिगौरवं, यो हि कायसारस्य बलमविदित्वा कुन्तमायुधमावहेत् सादिनस्तस्याजीर्णमजानतः पुरुषस्येवाति भुक्तमशनं कुन्तायुधं विषीभवति। इत्यौशनसे कुन्तलक्षणम्" कुन्ताः प्रविशन्तीत्यत्र कुन्तधारिणि लक्षणेत्यालङ्कारिकाः। "शक्तिकुन्तध्वजरथावाजिवारणगोवृषाः" सुश्रु०। "शक्तिकुन्ताद्यायुधानीति" सुश्रुतः।

**कुन्तल** पु० कुन्तं क्षुद्रकीटं (उकुण) लाति ला—क। १केशे "कापि कुन्तलसंव्यानसंयमव्यपदेशतः। बाहुमूलं स्तनौ नाभिपङ्कजं दर्शयेत् स्फुटम्" सा० द०। तदाकारत्वात् २ह्रीवेरे च अमरः। कुन्तलाकारं केशाग्राकारं लाति ला—क। ३यवे ४चषके पानपात्रे ५लाङ्गले च विश्वः। ६ध्रुवकभेदे "वर्णैः षोडशभिः कार्य्यः कुन्तलो लघुशेखरैः। शृङ्गारे च रसे प्रोक्त आनन्दफलदायकः" इति संगीतदामो०। "कामगिरिं समारभ्य द्वारकान्तं महेश्वरि!। श्रीकुन्तलाभिधो देशः कथितः पूर्व्वसूरिभिः" शक्तिसङ्गमतन्त्रोक्ते ७देशभेदे पु० भूम्नि "स्नाता तिष्ठति कुन्तलेश्वरसुता वारोऽङ्गराजस्वसुः" सा० द०। "अथापरे जनपदा दक्षिणा भरतर्षभ" इत्युपक्रमे "जिह्लिकाः कुन्तलाश्चैव सौहृदा नलकाननाः" भा० भी० ९अ० दक्षिणात्यजनपदोक्तौ। तेषां राजा अण्। कौन्तल तद्देशनृपे। बहुषु तस्य लुक्। क्वचित् एकत्वेऽपि लुक्। "आकर्षः कुन्तलश्चैव मालवाश्चान्ध्रकास्तथा। द्राविडाः सिंहलाश्चैव राजा काश्मीरकस्तथा" भा० स० १अ०। ते अभिजनोऽस्य अण्। कौन्तल पित्रादिक्रमेण तद्देशवासिनि। बहुषु तस्य लुक्।

**कुन्तलवर्द्धन** पु० कुन्तलान् वर्द्धयति वृध—णिच्—ल्यु। भृङ्गराजे (भीमराज) राजनि०। तद्रससेवनेन हि केशवृद्धिरिति वैद्यकप्रसिद्धिः।

**कुन्तलिका** स्त्री कुन्तलाग्राकारो विद्यतेऽस्याः ठन् अत इत्त्वम्। दध्यादिच्छेदन्यां १क्षुरिकाभेदे पालिकायाम् हारा०। २बाला नामौषधौ (बाला) स्त्री सुश्रुतः। यथा "कुन्तलिकाकुरण्टिकाप्रभृतानीत्युपक्रमे "स्वादुपाकरसाः शीताः कफघ्नाश्चातिपित्तलाः। लवणाद्र्रसाह्वाः सक्षाराः वातलाः सराः। स्वादुतिक्ता कुन्तलिका" [राजनि०।

**कुन्तलोशीर** न० कुन्तल इवोशीरम्। (बाला) नामौषधौ

**कुन्ताप** पु०। १वैदिके ऋचां पाठप्रकारभेदे तत्प्रकारः आश्व० श्रौ० ८।१।७।८।९। सू० दर्शितो यथा
"तस्मादूर्ध्वं कुन्तापम्" सू०
"तस्माद्वृषाकपेरूर्ध्वं कुन्तापं शंसेत्। तस्मादूर्ध्वमिति वचनात् माध्यन्दिने वृषाकपौ प्रविष्टे तदनन्तरं कुन्तापः स्यादसति प्रवेशे तृतीयसवनेऽपि तस्य प्रवेशो नास्तीति गम्यते" नारा० वृ०। "तस्यादितश्चतुर्दशविंशाहं निनर्द्यं शंसेत" सू०। "तस्य कुन्तापस्यादितश्चतुर्दश ऋचो विगृह्य निनर्दोऽयमपूर्व इति तस्याः स्वरूपनिदर्शनमाह" वृ०। "तृतीयेषु पादेषूदात्तमनुदात्तपरं यत् प्रथमं तन्निनर्द्देत्" सू०